13 GVS 2387. N. 9, 23. — [a]) It शास्त्रोपप्लुत-; Ic शास्त्रौघप्लुत- (for शास्त्रोपस्कृत-). D °शाब्द° (for °शब्द°). F_4t.v. शिष्योपदेशागमा. — [b]) E_2 विष्याताः; T_3 प्रख्याताः (for विख्याताः). A_3 विशंति; $Y_{6.7}$ T_3 भवंति (for वसन्ति). D तस्य (for यस्य). Aot B Eot $J_{1.3}$ $W_{1.2}$ X_2 Y_{1A} प्रभो (for प्रभोर्). — [c]) $F_{1.4}$ Wt (W_4t.v. as in text) कवयो (for सुधियो). B_1 F_3 $J_{2.3}$ $Y_{4.5}$ [ऽ]प्यर्थं; C Y_{6-8} $T_{1.3}$ $G_{1.4.5}$ M त्वर्थं; F_2 ह्यर्थैर्; W_4(t.v. as in text) येर्थं; X_2 त्स्वार्थं (corrupt); Y_2 T_2 चार्थं [orig. may have been *अर्थं (with hiatus) after caesura.] Y_3 विनाधीश्वराः. — [d]) $A_{2.3}$ B Eo $F_{4.5}$ W_2 Y_{1A} कुत्साः; $E_{1.5}$ F_2 J_3 कुत्सा; E_1t.v. निंद्या; G_{1-3} कुत्स्या (for कुत्स्याः). B_2 D F_{1-4} H W_4 (by corr.) Y_{1A} (and printed text). $_{4.5}$ कुपरीक्षका न; C Y_7 कुपरीक्षणे न; W (W_4 orig.) कुपरीक्षका हि ($W_{3.4}$ both c.v. °क्षकैः); X_1 कुपरीक्षकाश्च (for कुपरीक्षकैर्न). X_3 कुपरीक्षकाश्चमणयो. C मनयो; X_1 (orig.) मृगयो; X_1 (by corr.) मृणयो (for मणयो). A_2 B I H Y_7 अर्थतः; D Eo अधंतः; F_1 J_2 $W_{1.3.4}$ (orig.) X Y_3 अर्घ्यतः; F_5 अर्चितः; G_5 (orig.) अर्थितः (for अर्घतः). [It is difficult to distinguish between थ and घ in most N MSS.].

BIS. 6452 (2980) Bhartṛ. ed. Bohl. 2. 12. Haeb. 8. lith. ed. I. 14, II and Galan 15. Śatakāv. 78. Subhāsh. 303; SRB. p. 39. 27; SRK. p. 32. 2 (Bh.); SK. 6. 428; SG. f. 33a; SSV. 750; SMV. 11. 4.

14 [a]) $A_{1.3}$ H_2 क्षमाः (for क्षमा). — [c]) D E_2 $F_{2.4.5}$ H_1 I J_2 X $Y_{1A.3}$ चाभिरुचिर् (for °रतिर्). Y_7 विनयः (for व्यसनं). I श्रुते (for श्रुतौ).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥१४॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत् सर्वदा
*अर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान् प्रति मानमुज्झत नृपाः कस् तैः सह स्पर्धते ॥ १५ ॥

अधिगतपरमार्थान् पण्डितान् मावमंस्थास्
तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम् ॥ १६ ॥

BIS. 6147 (2825) Bhartr̥. ed. Bohl. 2. 53. Haeb. 9. lith. ed. I. and III. 62, II. 63. Galan 66. Hit. ed. Schl. I. 28. ed. Johns. 32. Subhāsh. 61. Saṁskr̥t Pāṭhop. 61. Carr. 463; Śp. 209 (Bh.); SRB. p. 50. 188 (Bh.); SBH. 267 (Meṇḍhaka); SKM. 6. 23 (Bhartr̥meṇṭha); SRH. 168. 30 (Bh.); SRK. p. 17. 62 (Bh.); SA. 24. 97; SHV. f. 46a; SK. 2. 66; PT. 1. 2; SSD. 2. f. 94b; SSV. 416; SKG. f. 17a.

15 [a]) X_2 $T_{1c.v.}$ हर्तुं याति न; M_5 हर्तुश्चानति-. E_{2t} F_4 (orig.) किमपि सं-; M_4 किमचिरं (for किमपि शं). C F_2 पुष्पाति; X_1 पुण्णंति. $E_{0.5}$ सर्वात्मना; $Y_{4.5}$ यत्सर्वथा; G_4 तत्सर्वदा. — [b]) A C चार्थिभ्यः; B D $E_{0.1.2c.3.5}$ $F_{1.4}$ I X $Y_{1.4-6.8}$ $T_{1.2}$ G_5 $M_{1.2}$ [अ]प्यर्थिभ्यः; E_{2t} $F_{2.3}$ H J W $Y_{2.3.7}$ T_3 G_{2-4} $M_{4.5}$ ह्यर्थिभ्यः; F_5 त्वर्थिभ्यः; G_1 M_3 प्रार्थिभ्यः (for *अर्थिभ्यः). $E_{3.5}$ प्रतिपद्यमानम्. $E_{0-2.5}$ वृद्धिं परां गच्छति. X_2 परं (for पराम्). — [c]) Y_2 नोपयाति (for न प्रयाति). Y_7 पद्याख्यम्. $M_{1.3}$ एकं (M_3 °तं) धनं (for अन्तर्धनं). — [d]) E_5 तान्मति-; J_1 तान्प्रतिपाद्य- (for तान्प्रति). E_5 मानमुद्गत-; F_5 (orig.) मानमुन्नत-; W_4 X_1 $Y_{1c.v.2}$ मानमुज्झति. A जनाः; X_1 $Y_{1c.v.2}$ नृपः (for नृपाः). Y_2 कस्सै; M_3 किं तैः (for कस्तैः). $E_{0.1}$ F_5 समं स्पर्धते; Y_2 न स स्पर्धते (for सह स्प°).

BIS. 7371 (3346) Bhartr̥. ed. Bohl. 2. 13. Haeb. 11. lith. ed. I. 15, II and Galan 16. Prasaṅgābh. 9. Subhāsh. 304; Śp. 203 (Bh.); SRB. p. 39. 28 (Bh.); SBH. 3459 (Bh.); SRK. p. 32. 4 (Bh.); SHV. f. 30a (Bh.); SU. 1430 (Bh.); SN. 693; SSV. 751; SMV. 11. 5; SKG. f. 11b.

16 $F_{1.4}$ order *cdab*. — [a]) E_0 अतिगत-; G_1 M_3 अवगत- (for अधिगत-). J_1 मानमंस्थान्; W_2 नावमंस्थास्; X_2 भावमंस्था; Y_2 मा(t.v. ना)गमंस्थास्. — [b]) F_2 तनु; J_1 मनु; J_2 $Y_{2.6}$ $G_{2.3}$ ननु (for लघु). M_3 सा रुणद्धि. — [c]) E_1 (before corr. in t. and c.) -मदलेख-; I_t -मदशोभा-; $J_{2.3}$ $Y_{2.4-8}$ T $G_{1.4}$ M मदरेखा- (M_3 °ख्या-); $G_{2.3}$ -मदधारा- (for -मदलेखा-). E_2 -स्याम-; $G_{2.3}$ -धौत-; M_3 -ध्यान- (for -श्याम-). C J $W_{1t.2t.4}$ (before corr.) X_1 Y_{1B} T_2 G_5 -गंडस्थलीनां; F_2 -गंडस्थलाभां; H_{1c} I -गल्लस्थलानां. — [d]) A B_1 E H I $Y_{2.3}$ बिशतंतुर्; W_{3t} विषतंतुर् (for बिसतन्तुर्).

BIS. 227 (82) Bhartr̥. ed. Bohl. 2. 14. Haeb. 12. Galan 17. Pañc. I. 79. Subhāsh. 304; Śp. 197; SRB. p. 39. 26; SBH. 2933; SRK. p. 32. 5 (Bh.); Kāvyālaṁkāra of Rudraṭa 1; Padyaracanā (KM. 89, p. 115. 67, Bh.); SK. 2. 57; SU. 1429 (Bh.); SSD. 2. f. 109a.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशाम्
आपन्नोऽपि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ १७ ॥

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्
असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ १८ ॥

मनसि वचसि काये पुण्यपीयूषपूर्णास्
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।

---

17 a) C जरार्दितोपि; $F_{1.2.4}$ (the last two t.v. as in text) X Y_{4-6} G_4 $M_{1.3-5}$ जरान्वितोपि (for °कृशोऽपि). A_3 $E_{0.2.3c.5}$ $F_{1.4}$ X शिथिलप्राणोपि; F_5 $W_{1.2c}$ विगत- (F_5 °तः)प्रायोपि; Y_3 शिथिलाः प्राप्तोपि (for शिथिलप्रायोपि). F_2 X दीनां (for कष्टां). — b) $H_{1t.2}$ W_c विभिन्न- (for विपन्न-). B_2 C E_{3t} $F_{2.3}$ J W $Y_{2.4-8}$ T G M नश्यत्स्वपि; Y_3 शामत्स्वपि (for गच्छत्स्वपि). — c) B C D Y_3 उन्मत्तेभ- (for मत्तेभेन्द्र-). B_2 T_3 -पलल-; D F_3 W_{1t} -दलन-; F_2 $J_{1.3}$ W_{3t} X Y (except Y_3) $T_{1.2}$ G M -पिशित-; J_2 -विशिखा-; $T_{3t.v.}$ -फलल- (for -कवल-). W_4 -बद्धास्पृहः; T_3 -बद्धः स्पृहः; M_5 -बंधस्पृहः. — d) G_1 M_3 जीवन्; M_5 जीर्णंस् (for जीर्णं). $A_{0t.1t.3}$ $E_{0-2.5}$ J_1 X_1 $T_{2.3}$ केशरी (for केसरी).

BIS. 2027 (791) Bhartṛ. ed. Bohl. 2. 22. Haeb. 13. lith. ed. I, II and Galan 29. Subhāsh. 304; Śp. 907 (Bh.); SRB. p. 230. 40 (Ratisena); SBH. 614 (Ratisena); SRK. p. 174. 1 (Śp.); ST. **16**. 1; Kāvyānuśāsana of Vāgbhaṭa 3 (KM. 43, p. 36); Padyaracanā (KM. 89, p. 102. 60, Bh.); SS. **54**. 5; SK. **3**. 206; SU. 1220 (Bh.); SSD. **2**. f. 35b.

18 Om. in ISM Kaḷaṁkar 195, and Mysore 582. Order *bacd* (to avoid sandhi across *ab*) in A_3 B E I; *cabd* in H. — a) C $J_{1.3}$ Y_{1A} न्याया; Y_6 वन्या (for न्याय्या). Y_3 वृत्तेर् (for वृत्तिर्). Y_7 $M_{1.3-5}$ असुभंगेषु (for °भङ्गेऽपि). — b) D F_3 J W X Y_{4-8} T G M त्वसंतो; F_1 $Y_{1.3}$ ह्य संतो; Y_2 क्व संतो (for असन्तो). G_2 न ह्यर्थ्याः; M_3 [ऽ]सामर्थ्याः (for नाभ्यर्थ्याः). Y_1 सकृदपि (for सुहृदपि). J_1 याच्य-; G_4 (t.v. as in text) वाच्यः; M_3 याञ्चः (for याच्यः). C Y_7 कृशधनैः; I_t तनुधनः; J_1 कृशधनं; Y_2 कृतधनः (for कृशधनः). — c) F_2 $J_{1.3}$ X_2 Y_{1-6} $T_{2.3}$ G_{2-4} $M_{1.2.4.5}$ स्थैर्यं; F_3 $Y_{7.8}$ T_{1B} $G_{1.5}$ M_3 धैर्यं (for स्थेयं). — d) A_3 °धारामृतम् (for °धाराव्रतम्).

BIS. 4354 (1922) Bhartṛ. ed. Bohl. 2. 61. Haeb. 14. lith. ed. I. and III. 27. Galan 28. Subhāsh. 304; SRB. p. 52. 248 (Jayāditya); SBH. 280 (Jayāditya); SDK. **5**. 35. 4 (p. 301, Dharmakīrti); SRK. p. 14. 39 (Bh.); PT. **1**. 56; SSD. **2**. f. 93b; SSV. 417 (*bacd*); JSV. **182**. 3 (*bacd*).

19 Om. in Mysore KB 340. — b) X परहितम् (for त्रिभुवनम्). C $H_{1t.v.}$ पूरयंतः (for प्रीण°). — d) C Y_1 (printed ed. only) विलसंतः (for विक°). Y_7 संति ये ते; T_2 ख्यापयंतः (for सन्ति सन्तः). A_2 किरंतं (for विकसन्तः).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ १९ ॥

इतः स्वपिति केशवः कुलमितस् तदीयद्विषाम्
इतश् च शरणार्थिनः शिखरिपत्त्रिणः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकैर्
अहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ २० ॥

क्वचिद् भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं
क्वचिच् छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम् ॥२१॥

BIS. 4691 (2106) Bhartṛ. ed. Bohl. 2. 71. Haeb. 15. lith. ed. I. 77, II and Galan 79. Prasaṅgābh. 9. Subhāsh. 304; SRB. p. 51. 221; SRK. p. 18. 76 (ST.); SS. 26. 10; PT. 1. 60; SG. f. 10b (Bh.); SSD. 2. f. 93b; SSV. 426; JS. 71; SKG. f. 20b, 22a.

20 ^{a}) Aot D इति (for इतः). D E_2t J_1 W $Y_{3.7}$ G_3 स्वपति (for स्वपिति). — ^{b}) $Y_{2.5.6.8}$ T_1 शरणार्थिनां (for °र्थिनः). C D F_2 J_3 **S** (except W_1 X_1) शिखरि(Y_8 °र)णां गणाः (G_4 °णः परा-); J_1 शिखरिपत्रिगाः. — ^{c}) A B_3 E H_{1c} I X_1 इतश्च (for इतोऽपि). G_1 M_3 सह समस्तकैवंर्तकैर्; G_4 सकलभूतसंवर्तकस. — ^{d}) G_4 त्वहो (for अहो). F_1 विभवमूर्जितं; H_{1c}.v. विततमूर्छितं; J_1 विरतमूर्जितं; J_3 विदितमूर्जितं. G_4 M_5 परसहं; M_4 वरसहं (for भरसहं). Y_7 हि (for च).

BIS. 1095 (419) Bhartṛ. ed. Bohl. 2. 68. Haeb. 16. lith. ed. I. 75. Galan 77. Subhāsh. 305; Śp. 1093 (Bh.); SRB. p. 216. 25 (Bh.); SBH. 886; SRH. 168. 41; SRK. p. 195. 9 (Bh.); Com. on Sarasvatīkaṇṭhābharaṇa 4. 49; AMD. 818; SSD. 2. f. 80a.

21 ^{a}) Ec भूमौ शय्याः; J_1 G_1 M भूमौ शायी; $Y_{4.5.7}$ T पृथ्वीशय्यः (T_3 °य्या); Y_6 $G_{2.8}$ भूमौ शेते (for भूमौ शय्या). B Eo (and Ec) F_2 $J_{1.3}$ X $Y_{2.4-7}$ T_3 G M पर्यंकशयनः; W_2 °शयने. — ^{b}) F_3 J_2 G_3 शाखाहारः; J_1 W $Y_{2.3}$ G_1 M_{1-3} शाकाहारी; X_2 शोकाहारः (for शाकाहारः). F_3 शाल्यौदनरुचिः; F_4 मिष्टाशनरुचिः. — ^{c}) $H_{1t.2}$ J_1 कंथामाली; J_2 कंधापूरी; X कंथाधारः; G_3 M_{1-3} क्रंधाधारी. C W_{2-4} चित्रांबरधरो; Y_2 दिव्यांबरधनो (for °धरो). — ^{d}) B_1 गणयति च; D F_{2-5} I $J_{2.3}$ **S** (except X_2) न गणयति; E_3 न गयति (for गणयति न). W_2 transp. दुःखं and सुखम्.

BIS. 1987 (772) Bhartṛ. ed. Bohl. 2. 79. Haeb. 18. lith. ed. I. 80. Galan 82. Śatakāv. 80. Subhāsh. 305; Śp. 4098 (Bh.); SRB. p. 369. 39 (Bh.); SBH. 2940 SKM. 7. 10; SRH. 168. 40; VS. 350 (Bh.); SHV. f. 71a (Bh.), 87a; SS. 64. 1; SK. 7. 32; SMV. 8. 12; JSV. 168. 5 (*var, bacd.*).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमस्यामो देवान् ननु हतविधेस् तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किमपरैः किं च विधिना
नमस् तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ २२ ॥

दौर्मन्त्र्यान् नृपतिर्विनश्यति यतिः सङ्गात् सुतो लालनाद्
विप्रोऽनध्ययनात् कुलं कुतनयाच् छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयान्
मैत्री चाप्रणयात् समृद्धिरनयात् त्यागात् प्रमादाद् धनम् ॥२३॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि ।

---

22 [a]) B_2 E_{3c} F_5 $M_{4.5}$ देवान्न तु; D $Y_{1c.v.3}$ देवाननु; E_{3t} देवा न तु; X_2 दवोः मनु; M_3 दैवान्न तु (for देवान्ननु). (Y_1 com. देवान्+अनु=अन्विति पश्चात्). W_{2-4} Y_2 हित-; X Y_1 G_1 M बत (for हत-). Y_2 तेपि वशजाः; G_1 M_{1-3} सत्त्वविवशा. — [b]) Y_7 विधिर्मध्यः. C -कर्मात्त-; G_1 M_3 -रक्तैक- (for -कर्मैक-). — [c]) J_1 M_5 कर्मायुक्तं (for °यत्तं). B_1 यदि****; B_2 C E $F_{1.3.4}$ H I $J_{1.2}$ X $Y_{1.8}$ $G_{2.3}$ यदि किममरैः; D तदपि किममरैः; W किममरगणैः; G_1 M_{1-4} यदिदमपरैः (for यदि किमपरैः). J_2 च न विना; Y_2 हि विधिना; G_4 नु विधिनो (for च विधिना). — [d]) D $E_{0.2t.3}$ I J_3 G_3 M_5 तत्कर्मेभ्यो; M_3 स्तात्कर्मेभ्यो; G_4 कर्मभ्यो (for तत्कर्मभ्यो).

BIS. 3367 (1431) Bhartṛ. ed. Bohl. and lith. ed. I. 2. 92, II. 94, III. 93. Haeb. 20. Galan 96. Subhāsh. 305. Śāntiśataka 1. 1 (Haeb. p. 410); Śp. 436 (Bh.); SRB. p. 93. 88 (Bh.); SBH. 3079; SRH. 34. 24. (Kāvyaprakāśa); SRK. p. 71. 11 (Bh.); Yaśastilakacampū of Somadeva (KM. 70, II. p. 256); SHV. f. 62a, 78a; SN. 798; SSD. 4. f. 5a; SSV. 22; JSV. 262. 3.

23 Om. in Punjab 2885. — [a]) F_4 It दुर्मंत्रान् (for दौर्मन्त्र्यान्). $W_{2.3}$ सती (for यतिः). — Portions before caesura of third and fourth quarters are transposed in D E $F_{1.3.5}$ I Y_3. — [c]) B_1 C $F_{5m.v.}$ I स्त्री मद्याद्; E ($E_{1t.v.}$ and c.) स्त्री गर्वाद् (for ह्रीर्मद्याद्). C अनवीक्षणाद्; Y_7 $M_{2.4}$ अनपेक्षणाद्. $E_{1t.v.}$ विदेशांतरान् (for प्रवासाश्रयान्). — [d]) $E_{1.2t}$ वा (for च). B_2 E_1 H_{1t} T_3 अनयात्त्याग-; Y_{1B} अनयात्त्यागा-; G_3 अनयत्यागात्. Y_2 प्रवासाद् (for प्रमादाद्).

BIS. 2991 (1260) Bhartṛ. ed. Bohl. 2. 34. Haeb. 21. lith. ed. I. 41, II. 42. Galan 46. Pañc. ed. Koseg. I. 185. ed. Orn. 135. ed. Bomb. 169. Kavitāmṛtak. 51. Prasaṅgābh. 16. Subhāsh. 107; Śp. 1533; SRB. p. 178. 1010; SBH. 2945; SRH. 181. 55 (Bh.); SRK. p. 240. 92 (Bh.); SHV. f. 96a. 71–72; PT. 9. 131; SSD. 2. f. 153b.

24 [a]) $Y_{4.6.8}$ T G_4 व्रतशुचौ; $M_{4.5}$ व्रतपरे (for °रुचौ). $J_{1.3}$ Y_2 $G_{1.4}$ M डंभः; G_2 (orig.) दर्भः (for दम्भः). T_3 कुचौ (for शुचौ). — [b]) $E_{0.1.2t}$ सूरे (for शूरे). E_0 °निर्घृणिता. (E_3 com. निर्घृणता=निर्दयिता). [To avoid hiatus] B D E_2 F_3 H I $J_{1c.2.3}$ X [आ]र्जवे; J_{1t} जडे; W $Y_{1.3.4.5.6.8}$ T $G_{1.2.5}$ M_{1-3} मुनौ; Y_3 रुजे; Y_6 गुरौ; G_4

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत् को नाम गुणो भवेत् स गुणिनां यो दुर्जनैर्नाङ्कितः ॥२४॥
जातिर्यातु रसातलं गुणगणस् तस्याप्यधो गच्छतां
शीलं शैलतटात् पतत्वभिजनः संदह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास् तृणलवप्रायाः समस्ता इमे ॥ २५ ॥
भग्नाशस्य करण्डपिण्डिततनोर्ग्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।

मतौ (for ऋजौ). X कुमतिता (for विम°). — [c]) C Eo J3 X2 Y2. 7. 8 T1 G4. 5 M1–4 वक्तव्यशक्तिः; D वक्तर्यशस्तिः; X1 वक्तिर्मशक्तिः (for वक्तर्यै°). J1 Y7. 8 स्थिते; G4 स्थितौ (for स्थिरे). — [d]) X2 तत्कर्मानु- (for तत्को नाम). B1 G3t गुणोभवत्; G4 गुणी भवेत्; M3 भवेद्गुणः (for गुणो भवेत्). C समस्त- (for भवेत्स). B Eo. 1. 5 F2 J3 W X2 Y1. 3. 7 G1. 4 M सुगुणिनां; F3 स गुणो सर्वगुणिनां (for स गुणिनां). W4 दुर्जयैर्नाकितः; Y2 M2 दुर्जने नांकितः; G1 M1. 3 दुर्जनानां मतः; G4 दुर्जने नांचितः; M4. 5 दुर्जनानां गुणः (for दुर्जनैर्नाङ्कितः).

BIS. 2375 (954) Bhartṛ. ed. Bohl. 2. 44. Haeb. 23. lith. ed. I. 53, II 54. Galan 58. Śatakāv. 80. Subhāsh. 306; SRB. p. 61. 263 (Bh.); SBH. 464 (Bh.); SKM. 8. 34; SRK. p. 26. 54 (ST.); SK. 2. 113; SG. f. 21b; SSD. 2. f. 131b; SSV. 525; SMV. 10. 28.

25 [a]) F1 जातु; Y7 याति (for यातु). Ec G1t.v. गुणगणास्. X1 गुणगुणस्. B H तस्मादधो; F3 J Y2. 4–8 T G3–5 तत्राप्यधो (for तस्याप्यधो). A3 B E2t I गच्छतु; F1 नीयतां; H J Y4–8 T3 G2 M4. 5 गच्छताच्; G5 गच्छतः (for गच्छतां). — [b]) Y7 शैलतटं; M4. 5 शैलतटीं (for °तटात्). D पतत्वभिजनैः; G4 पतत्वभिजनाः. — For 25[ab], C reads:

शीलं शैलतटात्पतत्वभिजनो निर्दह्यतां वह्निना
मा श्रौषं जगति श्रुतस्य विफले क्लेशस्य नामाप्यहम् ।

— [c]) F1 G4 शौर्यं (for शौर्ये). F1 वारिणि (for वैरिणि). A3 निपतितत्वर्थोऽस्तु; B1 पततादर्थोस्तु (for निपतत्वर्थोऽस्तु). C मे सर्वदा (for नः केवलं). — [d]) T3 ह्येकेनैव (for येनैकेन). C -बुस-; G1 M3 -लघु- (for -लव-). D F3 J Y (except Y3) G2–5 M1. 2. 4. 5 अमी; G1 M3 अपि (for इमे).

BIS. 2388 (965) Bhartṛ. ed. Bohl. 2. 32. Haeb. 24. lith. ed. I. 38, II. 39. Galan 42. Śatakāv. 81. Subhāsh. 65; Śp. 332 (Bh.); SRB. p. 64. 15 (Bh.); SBH. 3073 (var. Māgha); SKM. 125. 9 (Bh.); SRK. p. 44. 9 (Bh.); ST. 41.11; Padyaracanā (KM. 89, p. 111. 40, Bh.); VS. 299 (Bh.); SHV. f. 66b (Bh.) and 82a; SS. 39. 12; SK. 2. 174; SU. 1515; SSD. 2. f. 105a; SMV. 4. 6.

26 [a]) Y2 भग्नायस्य. A2. 3 B1 D E5 F4 H2 (m.v. as in text) W X Y1. 3 पीडिततनोर् (X °नुर्). [Ao. 1 com. पिंडिततनोः कहतां सरीर संकुडाणौ छइ]. B1 E3t F1–4 H J S म्ला(M3 मा)नेंद्रियस्य (for ग्लाने°). — [c]) C वक्त्रे सुखं (for नक्तं मुखे). — [c]). W4 तृसस्यातिपिसितेन. F1 M3. 4 तत्क्षणमसौ (M3 °हो) (for सत्वरमसौ). F2 तथा (for पथा). — [d]) F5 सुस्थास्तिष्ठत; W (Wc as in text) लोकाः पश्यत; Y1

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास् तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये चाकुलम् ॥२६॥

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ २७ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्स् तदभवद् दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस् त्वीदृशी ॥ २८ ॥

स्वस्थास्तिष्ठति; M_5 स्वस्थं तिष्ठत. I शरणं; J $Y_{1.4-8}$ T G (except G_4) $M_{1.2.4.5}$ हि परं; M_3 जगतां (for हि नृणां). C वृद्धौ परं; J_1 G_2 वृद्धिक्षये; J_2 वृद्धौ क्षणे; W_4 वृद्धक्षये. C D F J S (except Y_6) कारणं (for चाकुलम्). I (c.v. as in text) धिग्धिग्वृथा पौरुषं.

BIS. 4528 (2012) Bhartṛ. ed. Bohl. 2. 92. Haeb. 25. lith. ed. I. 83, II. 85. Galan 88. Pañc. ed. Koseg. II. 88. Śuk. 6 (Pet. Ms. 13b). Subhāsh. 107 and 306. Vikramacaritra 177; SRB. p. 94. 109; SBH. 3143; SDK. 5. 71. 2 (p. 324); SRK. p. 71. 12 (Bh.); SHV. f. 64a (Bh.) and 80a; SN. 802; SSD. 4. f. 2b; SSV. 284; SMV. 8. 15; JSV. 264. 8.

27 [b]) B D E F_2 H I W भूषितोपि सन्; $F_{4.5}$ [अ]लंकृतो यदि; X_1 °कृतोप्यसन्. J_1 lacuna for यालंकृतोऽपि सन्. — [c]) F_5 नागः (for सर्पः).

BIS. 2850 (1180) Bhartṛ. ed. Bohl. 2. 43. Haeb. 30. lith. ed. I. 52. Galan 56. Galan var. 82. Hit. ed. Schl. I. 75. ed. Johns. 90. Subhāsh. 89, 306. Cāṇ. (Haeb. p. 25, Hoefer 314. Troyer 73). Rājataraṅgiṇī I. 324. Saṁskṛtapāṭhop. 55; Śp. 354; SRB. p. 55. 70 (var. Cāṇakya); SBH. 355 (Vālmīki); SRH. 32. 24 (Sārasvatīkaṇṭhābharaṇa); ST. 3. 30; SA. 27. 51; VS. 378 (Cāṇakya); SK. 2. 118; SU. 1577; PT. 8. 1; SSD. 2. f. 129a; SSV. 517; SMV. 10. 7; JSV. 198. 8.

28 [a]) J_1 क्षीरेणात्मगतो****; Y_{3-5} $G_{2.3.5}$ -गतोदके (Y_3 °को) ननु (for -गतोदकाय हि). C T_2 हि पुरा; E_2 H सकला (for हि गुणा). C T_2 गुणास्तेखिलाः; E_2 H_1t (com. as in text). ₂ निजा ये गुणाः; J_1 निजास्ते किल; Y_2 T_3 G_5 निजास्तेखिलाः; G_1 M पुरा स्वे($M_{4.5}$ ये)-खिलाः. — [b]) C F_5 $J_{1.3}$ X_2 $Y_{2.6-8}$ T_1 $G_{1.2.4}$ M_{1-4} क्षीरो(M_4 °रा)त्तापम्; E_3t क्षीरं तप्तम्; Y_4 क्षारे तापम्. E_2t अवेत्य; X अवीक्ष्य; T_3 अपेक्ष्य (for अवेक्ष्य). B_1 E $F_{3.5}$ H J W $Y_{2.7}$ $G_{2.3}$ $M_{4.5}$ ह्यात्मा; C I [अ]प्यात्मा (for स्वात्मा) [Original may have been *आत्मा (with hiatus) after caesura]. Y_3 हतः (for हुतः). — [c]) C Y_7 G_4t.v. उन्मुखं; $E_{2.3}$ Y_3 G_1t. v. M_{3-5} उन्मनास्; G_1 उन्मुखास्; G_4 उन्मुनस् (for उन्मनस्). E_3 समभवद् (for तद°). A E_ct. 1. 2 F_5 G_2t दृष्ट्वा नु; E_3 दृष्ट्वात्म-; I दृष्ट्वा स्व- (for दृष्ट्वा तु). — [d]) X_2 सुक्तं; M_3 यत्तं (for युक्तं). X Y_1 तच्च (for तेन). J_2 ताम्यति (for शाम्यति). B_1 पुनर्; B_2 पयो; E_c -तमां (for सतां). A C E_2 W पुनस्तादृशी; B सतामीदृशी; D पुनस्त्वदृशी; F_5 Y_5 $G_{2.3}$ -गुणस्त्वीदृशः; J_1 ***दृशी; X Y_3 -गुणास्त्वीदृशः; Y_2 $G_{1.4}$ M_3 -गुणास्त्वीदृशाः; Y_4 पुनस्त्वीदृशः; G_5 पुरा त्वीदृशी; M_2 -गुणस्त्वीदृशी.

BIS. 2026 (790) Bhartṛ. ed. Bohl. 2. 67. Haeb. 31. lith. ed. I. 74, II and Galan 76. Subhāsh. 306; SRB. p. 88. 20; SRK. p. 55. 11 (Bh.); SHV. f. 73a. 810 (Bh.); SS. 42. 2; SSD. 2. f. 113a; SMV. 13. 20; SKG. f. 17a.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या साधूंश् च खलान् करोति विदुषो मूर्खान् हितान् द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय चक्रिकां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो त्वमतो गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥२९॥

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन् नरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ ३० ॥

---

29 Om. in BORI 326. — [a]) Y_8 बंधूंश् (for साधूंश्). A_{0-2} खलवत्; C I प्रखलान्; $F_{3.4}$ हि खलान्; J_3 च बलात्; W_1t स खलान्; W_4t शकलान्. J_1 या या साधुश्च बलात्करोति; J_2 या *** खलान्करोतु. D विदिशो; Y_7 विदुषां (for विदुषो). J_2 मुख्यान् (for मूर्खान्). — [b]) X_2 प्रत्यक्षे (for प्रत्यक्षं). — [c]) C D $F_{3.5}$ (orig.) Y_8 चंडिकां; $F_{1.2}$ शांकरीं; F_4 वक्रतां; F_5 (by corr.) वक्त्रिकां; J_2 भत्क्रतां; W X $Y_{1.2.4-8}$ T G M सत्क्रियां (for चक्रिकां). [$A_{0.1}$ com. चक्रिकां भगवतीं = कालचक्ररूपिणीं प्रकृतिरूपभवानीं; B com. चक्रिका = राजमण्डली; E com. चक्रिकां = चक्रेश्वरीं; F_5 (marg.) वक्त्रेव वक्त्रिका = सरस्वती; H com. and I com. चक्रिकां = चक्रेश्वरीं सरस्वतीं; J_1 com. चक्रिकां = समस्तफलसमूहवन्तुवल्लंथा; W com. also gives अथ वा विपरीतं अस्मिन्मोहाब्धौ गुणेषु आस्था मा कृथा मा कुरु च[व]क्रियां भगवतीमाराधय च[व]क्रेण विना अस्मिन्गुणे फलं न भवति] $Y_{4.5}$ भोक्तुः (for भोक्तुं). — [d]) F_5 मोहाब्धौ (for हे साधो). B F_5 $G_{2.4}$ व्यसने; D त्वस्मृतो; E_3 $F_{3.4}$ J W $Y_{2.4-8}$ T $G_{1.3.5}$ M व्यसनैर् (for त्वमतो). A_3 F_2 विकलेषु; C D $E_{0-2.5}$ $F_{1.4}$ J_3 X $Y_{1.8}$ G_3t M_{1-4} विफलेषु (for विपुलेषु). J_1 विफलैः ष्वास्थां; M_5 विपुलैष्वास्थां. [पु = फ in older Devanāgarī] E_3 H_2 $W_{1.4}$ X_2 Y_7 [आ]स्था (for [आ]स्थां). J_2 वृथां.

BIS. 5499 (2487) Bhartṛ ed. Bohl. and lith ed. I. 2. 96. Haeb. 32. lith. ed. II. 98. Galan 100. Subhāsh. 307; SRB. p. 93. 97; SBH. 3074 (Śrīvardhana); SRK. p. 76. 8 (ST.).

30 [a]) C F_{1-3} $J_{1.3}$ W_{2-4} X_2 Y_1t. 2. 3. 7 $T_{1A.2.3}$ G_4 क्रिमि- (for कृमि-). B_1 -दितं; J_2 -विडं; G_1 M_3 -शतं (for -चितं). C लालापूर्णं. J_3 Y_2 T_3 M_1 कुगंधि; W_{1-3} विगर्हितं (for विगन्धि). — [b]) D E_3t F_3 J_2 W (W_4 orig. and c) Y_3 G_{1-3} M_{1-3} निरुपमरसं; J_1 व्रिरुपमरस-; X Y_1 अनुपमरस-. B_2 $F_{3.4}$ H J Y_3 स्वा(H_{1c} आस्वा)दन्; F_5 [आ]स्वाद्य (for खादन्). I (by corr.) Y_3 निरास्थि; W_4t X $Y_{1.6.7}$ $T_{1.2}$ G_5 खरास्थि (for नरास्थि). — [c]) J_3 M_5 पार्श्वस्तं. A_{0-2} $F_{1.2.4}$ $J_{1.3}$ च शंकते; E_3t न शंसते; H_1 (c.v. as in text). 2 $Y_{4.5}$ $G_{2.3}$ विशंकते; J_2 lacuna (for न शङ्कते). — [d]) B_1 $J_{1.3}$ न हि गुणयति; $E_{0-2.5}$ Y_1 गणयति न हि; W_4 X_2 न हि गणपति; G_3 विगणयति न (for न हि गण°). F_5 सुद्रो (for क्षुद्रो). $A_{1.2}$ B_2 F_4 H X_1 मैत्री- (for जन्तुः).

BIS. 1894 (728) Bhartṛ. ed. Bohl. 2. 9. Haeb. 33. lith. ed. I. 8. Galan 11. Śatakāv. 82. Nītisaṃk. 65. Subhāsh. 307. Śāntiś. 2. 8; SRB. p. 177. 997; SDK. 5. 68. 5 (p. 322, Śūla); SRK. p. 34. 6 (Bh.); SSD. 2. f. 132b.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पापान् निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ३१ ॥

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ३२ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।

---

31 a) B_2 H_2 W_1 Y_2 पापं (for पापान्). G_1 (t.v. as in text) यो यतते (for योजयते). Y_7 विहाय; M_2 हितानि; M_4 हितं ये (for हिताय). — b) B_1 C F_5 H J W X_2 Y_{3-6} गुह्यं च गूहति; D दोषं च गूहति; F_2 गुह्यत्वगुह्यति; F_3 दोषांश्च गूहति; X_1 गुह्यं च गुह्यति; $Y_{1.2}$ G_1 $M_{4.5}$ गुह्यानि गूहति; G_3t गुह्यं च गूहयति; M_3 गुह्यान्निगूहति. — c) $W_{3.4}$ आपद्गते. T_3 om. च. W_2 [ऽ]पि पुरुषे न; Y_3 च निजहाति; $Y_{4.5}$ $G_{2.3}$ न विजहाति (for च न जहाति). A_2 om. ददाति. E_1 (orig.) तथापि; $W_{2.4}$ जहाति; Y_1 तदाति (Y_{1A} ददाति as in text). — d) B_2 J_1t Y_8 तन्मित्र- (for सन्मित्र-).

BIS. 4060 (1771) Bhartṛ. ed. Bohl. 2. 64. Haeb. 35. lith. ed. I and III. 71. Kavitāmṛtak. 25. Prasaṅgābh. 13. Subhāsh. 307; SRB. p. 88. 18; SK. 6. 9; SSD. 2. f. 113a; JSV. 214. 11.

32 b) E_5 °विहीत°; F_2 J_2 °निहित°; T_3 °निहीन° (for °विहित°). — c) D F_5 X_2 T_{1A} $G_{3.4}$ M_{1-4} °पिशुनानां; $W_{2.4}$ °पिशुनो (for °पिशुना). — d) A_{0-2} B_1 E_{0-3} F_3 I J_1 निःकारण(F_3 °णं)वैरिणो; E_5 F_2 J_3 S (except W_3 X $Y_{3.4.6}$) निष्कारणमेव वैरिणो; F_5 निष्कारणं वैरिणो. G_4 भवंति (for जगति).

BIS. 4931 (2234) Bhartṛ. ed. Bohl. 2. 51. Haeb. 36. lith. ed. I and II. 60. Galan 64. Subhāsh. 307; SRB. p. 57. 136 (Bh.); SBH. 422 (Bh.); SRK. p. 27. 56 (Bh.); Sūktāvalī; Alaṁkārakaustubha (KM. 66, p. 314, second half only). Kāvyānuśāsana of Vāgbhaṭa 3 (KM. 43, p. 41); SA. 26. 60; VS. 884 (Bh.); SS. 27. 9; SK. f. 146b; SSD. 2. f. 159b; SSV. 518.

33 Order in A_3 is *acbd*. — a) D F_3 J S (except W) श्रूयते (for ज्ञायते). — b) M_5 बिसिनी° (for नलिनी°). D J $Y_{2.4-8}$ T $G_{1-3.5}$ $M_{1.2}$ दृश्यते; G_4 जायते; M_{3-5} लक्ष्यते (for राजते). — c) D F W X $Y_{1.3}$ G_4t.v. स्वात्यां; J $Y_{2.4-8}$ T G M अंतः- (for स्वातौ). A_3 °सूक्तिसंपुटगतं; C D F I J_3 W $Y_{2.3.6.7}$ T G_3t. 4. 5 M_4 °शुक्तिमध्यपतितं; $J_{1.2}$ $Y_{4.5}$ $G_{1.2.3c}$ $M_{1-3.5}$ °शुक्तिकुक्षिपतितं (for °शुक्तिसंपुटगतं). C D F_3 J W_1t. 4t Y_{2-8} T G M तन्मौक्तिकं जायते; F_5 Wc मुक्ताफलं जायते; $W_{2.3}$ तन्मौक्ति संजायते (for तज्जायते मौक्तिकं). — d) A C D $E_{0.1.2t.5}$ $F_{1.3}$ W_2 -गुणः (for -गुणाः). A_3 C D F_{1-4} W (com. gloss or reading) X Y_1 संसर्गतो (for संवासतो). E_3 संवासतो (gloss संसर्गतो). H X Y_1 देहिनां; W_1 ज्ञायते (for जायते). F_5 I प्रायेणोत्तममध्यमाधमगुणाः (I °णः) संसर्गतो भूयते (I संवासतो जायते); J Y_{2-8} T G M प्रायेणाधमम [illegible] वृत्तयः.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वातौ सागरशुक्तिसंपुटगतं तज् जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणाः संवासतो जायते ॥ ३३ ॥

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ ३४ ॥

मौनान् मूकः प्रवचनपटुर्वातलो जल्पको वा
धृष्टः पार्श्वे भवति च तथा दूरतोऽप्यप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ३५ ॥

BIS. 6781 (3152) Bhartṛ. ed. Bohl. **2**. 57. Haeb. 37. lith. ed. I. 66, II. 67. Galan 69. Pañc. ed. Koseg. I. 280. ed. Bomb. 250. Subhāsh. 105; Śp. 330 (Viṣṇuśarman); SRB. p. 87. 33; SA. **24**. 17; Padyaracanā (KM. 89, p. 111. 38, Bh.); SS. **29**. 2; SK. **2**. 187; SU. 1464; SSD. **2**. f. 125b; SSV. 654; SMV. **9**. 51; JSV. **177**. 6; SKG. f. 13a.

34 F_5 substitutes मालतीकुसुमस्येव. — [a]) B_2 X G_3 M_4 [ए]व (for [इ]व). — [b]) C T_1c.v. M_1 द्वे गती हि; J Y_8 T_2 M_{3-5} द्वे गती तु; W_2 Y_2 द्वे गती च; X_1 द्वे गती सु- (or तु); Y_1 द्वे गती स्तो; T_3 द्वेधा वृत्तिर्; G_1 द्वे हि वृत्तिर्; M_2 द्वे हि वृत्ती (for द्वयी वृत्तिर्). X_1 Y_1 मनस्विनां (for °स्विनः). — [c]) $W_{2.3}$ मूर्धनि (for मूर्ध्नि वा). E_3t F_3 -लोकानां (for -लोकस्य). — [d]) E_ot H_2 शीयते; E_3t स्थीयते; $G_{2.3.5}$ जीर्यते (for शीर्यते). J_2 F_4 W_1 (by corr.).$_3$ विशीर्येत वनेथ वा; W_1(orig.).$_{2.4}$ (orig.) विशीर्येत वने यथा.

BIS. 1845 (708) Bhartṛ. ed. Bohl. **2**. 25. Haeb. 39. lith. ed. I. 33, 102, II and Galan 33. Hit. ed. Schl. I. 126. ed. Johns 141. Subhāsh. 308; Śp. 264 (Bh.); SRB. p. 79. 4 (Bh.); SBH. 201 (Ravigupta), and 509; SKM. **7**. 2 (Bh.); SRH. **102**. 2; SRK. p. 48. 9 (Śp.); SA. **24**. 46; ST. **43**. 22 (Bh.); Garuḍamahāpurāṇa **110**. 13; SHV. f. 71a (Bh.), 87a; SM. 1572; SSV. 1544; JSV. **168**. 2; SKG. f. 17a.

35 Order in A C, is *acbd*. W_3 reads st. 35 twice. — [a]) J_3 मंदान्मूकः. A_3 H_1c It वातकी; B_1 $F_{1.2.5}$ W वातुलो; D वातुकी; E_2 F_4 जल्पको; F_3 $Y_{3.6.8}$ T $G_{1.4}$ M वाचको; H_1t.$_2$ Ic वातको; $J_{1.2}$ पित्तको; X Y_1 चाटुलो; $Y_{2.4.5.7}$ वादको; $G_{2.3.5}$ वातिको (for वातलो). E_2 वातलो; F_4 वातुलो (for जल्पको). — [b]) H_1m.v. J_3 Y_7 T_3 M_2 दृष्टः; J_1 दुष्टः; W_4 घृष्टः; $Y_{4.5}$ $G_{2.3}$ धृष्णुः (for धृष्टः). B $Y_{1.7.8}$ G_1 M_{1-3} वसति च; C भवति न; W_{1-3} प्रभवति (for भवति च). G_4 निवसन् (for च तथा). W_{1-3} J_3 तदा; Y_1 सदा; $Y_{2.4-6.8}$ T $G_{2.3.5}$ $M_{4.5}$ वसन् (for तथा). B C D E_3 F_5 H W Y_3 दूरतश्चाप्रगल्भः; $E_{o-2.5}$ दूरतश्च प्रमादी; I X (X_2 lacuna) दूरतश्चाप्रमादी; M_4 दूरतस्य प्रगल्भः; M_5 दूरगोप्यप्रगल्भः. (E com. प्रगल्भः कथ्यते वा प्रमादी कथ्यते). — J_1 lacuna for 35^{cd}. — [c]) $A_{o.1}$ $E_{o.1.3}$ प्रायसो. E_3 नातिजातः; T_3 नाभिजाने (for °जातः).

BIS. 4987 (2257) Bhartṛ. ed. Bohl. 2. 48. Haeb. 40. lith. ed. I. 57, II. 58. Galan 61. Hit. ed. Schl. II. 26. ed. Johns. 25. Vet. in LA (III) 29. Subhāsh. 308. Pañc. I. 285; SRB. p. 97. 15; SDK. **5**. 42. 1 (p. 305); SRK. p. 109. 11 (Bh.); SL. f. 55b; SM. 1663; SN. 871; SSD. **2**. f. 146a; SSV. 1622; SMV. **20**. 5; JS. 513.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः
स्वार्थान् संपादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्मुखान् दूषयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः॥३६॥

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत् तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं जनैः स्वमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ ३७ ॥

---

36 Om. in NS2. — [a]) B $F_{1.2.4}$ (t.v. as in text) J $M_{4.5}$ नुतिभिः (for कथनैः). Y_{1B} स्वागुणान्. F_3 W_3t व्यापयंतः; $W_{2.3c.4}$ स्थाप°; Y_{1c} वाच° (for ख्याप°). — [b]) B कुर्वतः स्वीयमर्थं; $F_{1.2.4}$ (t.v. as in text) G_1 M पु(F_2 मु)ष्णंतः स्वीयमर्थं; H It स्वार्थं संपादयंतो. B $Y_{7.8}$ G_1 M सतत-; F_2 विवृत-; Y_3 वितथ-; G_4 विविध- (for वितत-). A_3 X Y_1 -बहुतरा°; B Y_8 G_1 M_{1-3} -कृतमहा°; E_3t F_5t.v. -पृथुफला°; $W_{2.4}$ -प्रियतरा°; G_2t -परधना°; $M_{4.5}$ -कृतसमा° (for -पृथुतरा°). F_4 -रंभयत्नैः; It -रंभयित्वा (for -रम्भयत्नाः). F_5 J_1 परार्थैः; I परार्थान्. — [c]) A_2 क्षांतौवाक्षेप-; B C D E_5t H क्षांत्यैवोपेक्ष्य (E_5 °क्ष); E_0t.1t क्षांत्यैवापेक्ष्य-; F_4 $W_{3.4}$ क्षांत्यैवक्षेप- (F_4m.v. °वानेक-); J_1 क्षांत्येवाक्षेप- (for क्षान्त्यैवाक्षेप-). $W_{1.3.4}$ -रुक्षाक्षर-; J_1 -रूपाक्षर- (for -रूक्षाक्षर-). W_4 om.; M_{3-5} परुष- (for -मुखर-). D F_3 Y (except $Y_{1c.3}$) T G M दुर्जनान् (for दुर्मुखान्). A_{0-2} दूषयंतः क्रियंतः; W_{2-4} दूषयंतः समंतात् (for दुर्मुखान्दूषयन्तः). B धर्षयंतः; C D F_4t.v. I $J_{2.3}$ $Y_{2.4.5.7.8}$ T G M_{1-3} दुःखयंतः; J_1 दुर्जयंतः; Y_6 दूरयंतः; $M_{4.5}$ पीडयंतः (for दूषयन्तः). — [d]) E_3 $F_{2.3}$ G_2 चाश्चर्य-; H_{1c} स्वाश्चर्य-; $W_{2t.3t.4t}$ [ऽ]प्याश्चर्य-; G_4 त्वाश्चर्य- (for साश्चर्य-). B_2 $E_{0.3}$t W_{4c} X_2 -वर्याः; F_4m.v. -भूताः (for -चर्याः). (E com. generally चर्यं($E_{0c.3c}$ वर्यं)=सौंदर्यं). X बहुमतो. C It $J_{1.3}$ Y_7 T_3 G_1 $M_{2.3}$ नाभ्यर्थनीयाः. B त्रिभुवनभवने वंदनीया जयंति; $M_{4.5}$ सदसि बहुमताः के(M_5 क)स्य न स्युर्नमस्याः (for जगति बहु° etc.).

BIS. 3379 (1434) Bhartṛ. ed. Bohl. 2. 59. Haeb. 41. lith. ed. I. 68, II. 70. Galan 71. Prasaṅgābh. 11. Subhāsh. 308; SRB. p. 53. 277; SBH. 286; SRK. p. 18. 75 (Śp.); SSD. 2. f. 92b; SSV. 430.

37 A_3 order *bacd*; F_5 *bcad*. — [a]) A_{0-2} स्नेहगुणेन; G_1 चेत्सुगुणेन (for चेदगुणेन). J_1 पिसुनता. F_3 पावकैः (for पातकैः). C लोभश्चेति गुणेन किं सुखशतैर्यद्यस्त्यनायत्तता. — [b]) E_1 तपसापि. I Y_3 तीर्थैश्च. — [c]) Omitted in W_3. A_3 B E (E_{5c}) F_5 H I J $X_{1.2}$ (by corr.) $Y_{1c.v.4.5}$ T_3 $G_{2c.3}$ निजैः; C हितैः; D $F_{1.2.4}$ $Y_{1.6.8}$ $M_{4.5}$ गुणैः; Y_7 बलैः; G_2t चनै (sic); M_3 धनैः (for जनैः). A_3 तु; C E_5t F_5 H J_2 W (W_3 om.) $Y_{3.6.8}$ T_3 G_1 M_{1-3} सु-; I श्च- (for स्व-). Y_2 सौजन्यं स्वजनेन किं सुमहिमा; $T_{1.2}$ सौजन्यं यदि किं बले(T_2 जने)न महिमा (before caesura). — [d]) H_2m.v. धनैपरयशो. X यद्यस्तु (for °स्ति).

BIS. 5881 (2686) Bhartṛ. ed. Bohl. 2. 45. Haeb. 42. lith. ed. I 54, II. 55. Galan 57. Ṣadratna 6 (Haeb. p. 5). Kāvyakal. 6. Kāvyas. 3. Nītisaṁk. 26. Prasaṅgābh. 10. Subhāsh. 221; Śp. 1553; SRB. p. 178. 1015 (Amaruka); SRK. p. 240. 93 (Bh.); Cāṇakyanītidarpaṇa 17. 4; SA. 27. 44; SHV. app. I. f. 9a. 38; SS. 35. 6; PT. 9. 158; SSD. 2. f. 156b; SSV. f. 85b. 84 (*bacd*); JS. 644.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अम्भोजिनीवनविलासनिवासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ ३८ ॥

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन् देशमनातपं विधिवशाद् बिल्वस्य मूलं गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस् तत्रैव यान्त्यापदः ॥ ३९ ॥

38* Om. in NS2. Extra in NS1. Punjab 2101 on margin of f. 5a as N44. — [a]) F_{2} J_{1} W X Y_{2} अंभोजनी-. A_{3} -विलासविनोदमेव; B C D E F_{1-3} H I $J_{2.3}$ W (W_{4} orig.) X Y_{1-3} -निवासविलासमेव (D °ससौख्यं); F_{5} -विलासनमेव हंत; W_{4} (by corr.) $Y_{6.8}$ $T_{1.2}$ -विहारविलासमेव; G_{5} -विलासविहासमेव: M_{5} -विलासिनिवासमेव. — [b]) W_{4} हंतस्य (for हंसस्य). $E_{1}t$ (and Ec) हंत; G_{1} हंतु (for हन्ति). C सुतरां (for नितरां). Y_{3} बलवान्; M_{3} कवितो (for कुपितो). Y_{1A} [ऽ]पि धाता (for विधाता). — [c]) A_{0-2} नैवास्य; A_{3} नैतस्य; E_{5} न न्वस्य; M_{3} नान्यस्य (for न त्वस्य). F_{4} °भेदविधि-; J_{1} °भेदविध- (for °भेदविधौ). B प्रगल्भां; C प्रसिद्धं; D प्रदिग्धां (for प्रसिद्धां). — [d]) A_{2} B_{1} D $E_{1.2}t$ (and Ec generally) F_{5} I J_{3} $W_{2.3}$ Y_{2} T_{3} (orig.) वैदग्ध-; C वैगंध्य- (for वैदग्ध्य-). C अपहातुम्; G_{2} $M_{1.4.5}$ अपहंतुम् (for °हर्तुम्).

BIS. 544 (201) Bhartṛ. ed. Bohl. 2. 15. Haeb. 43. Galan 18; Śp. 797 (Bh.); SRB. p. 221. 15 (Bh.); SKM. 15. 2; SRK. p. 183. 2 (Bh.); ST. 12. 2; VS. 22; SK. 3. 136; SU. 1149 (Bh.); SKG. f. 16a.

39 [a]) F_{2} खल्वाटे; T_{1A} G_{1-4} M ख(M_{3} खा)वांटो. C J_{2} G_{1} $M_{2.4}$ संताडितो; E_{0} °संतापतो; $J_{1:3}$ Y_{4-8} T G_{2-5} संतापिते (for °पितो). — [b]) J Y_{4-8} T G_{2-5} $M_{1.2}$ गच्छन्; G_{1} भ्राम्यन् (for वाञ्छन्). C J Y_{4-8} T G M_{2} द्रुतगतिः; Y_{2} द्रुतमसौ (for विधिवशाद्). I छायार्थी समुपेत्य सत्वरमसौ. D $F_{1.3}$ J S ताल(W_{1-3} °ड)स्य (for बिल्वस्य). E_{3} T_{2} मूले. T_{2} स्थितः (for गतः). — [c]) W तत्राप्याशु (for °प्यस्य). J_{1} पततस्. A_{3} I तत्रोच्चैर्महता फलेन पतता; T_{3} तत्रस्थेपि महत्फलं निपतितं; G_{1} तत्रस्थस्य च तत्फलेन पतता; M_{3} तत्रस्थस्य तु तत्फलैर्निपतितैर्. $T_{2.3}$ भिन्नं (for भग्नं). C $M_{1.3.5}$ समस्तं; X सशब्दः (for सशब्दं). J_{1} तालस्य भग्नं शिरः. — [d]) F_{1-3} दैवरहितस्; $J_{1.3}$ X $Y_{1.4-8}$ T G $M_{1.2.4.5}$ दैवहतकस्; J_{2} दैवकृतकस् (for भाग्यरहितस्). M_{3} यत्रायांति हि मंदभाग्यनिवहस्. $A_{0.1}$ तत्रैव यात्यापदः (com. आपदो याति probably acc. plural); A_{3} C $E_{3}t$ $F_{1.2.5}$ H_{1} (c.v. as in text).2 I W तत्रापदां भाजनं; X_{2} $G_{2}t$ तत्रैव यंत्यापदः.

BIS. 2048 (802) Bhartṛ. ed. Bohl. 2. 86. Haeb. 44. lith. ed. I. and III. 89. Galan 91. Subhāsh. 308; Śp. 437 (Bh.); SRB. p. 94. 114 (Dibiradevāditya); ŚBH. 3141 (Diviradevāditya); SRH. 36. 7 (Pañc.); SRK. p. 71. 13 (Bh.); VS. 959 (Devāditya); SHV. f. 65a (Bh.) and 80b; SS. 46. 8; SG. f. 34a; SSD. 4. f. 4b; SMV. 8. 5.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा किल संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ४० ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः शमस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस् तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ४१ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।

---

40 [a]) X_2 भवति (for फलति). W_4 om.; X_1 च शीलं (for न शीलं). — [b]) A F_{1-4} H J न चापि; W_8 Y_3 च नैव; Y_8 M_5 न दैव (for [अ]पि नैव). F_1 नव-; T_2 च न (for न च). C यत्नकृता च सेवा; F_1 यौवनकृतापि सेवा. — [c]) G_1 M_{1-3} पुण्यानि (for भाग्यानि). B_1 पूर्वजनुषा; Y_2 पूर्वतपसां. C Est J_3 $W_{1,2}$ Y_{3-8} T G M खलु; D बहु; $J_{1,2}$ [अ]खिल-; Y_2 फल- (for किल). W_1 सेवितानि (for संचि°). — [d]) X_1 पुरणस्य (for पुरुषस्य). E_2 यथेह; J_1 च दैव-; Y_7 यदैव; $M_{4,5}$ यथा हि (for यथैव).

BIS. 3825 (1648) Bhartṛ. ed. Bohl. and lith. ed. I. 2. 94. Haeb. 45. lith. ed. II. 96. Galan 98. Subhāsh. 108. Vikramacaritra 173, 263; SRB. p. 92. 72 (Aśvaghoṣa); SBH. 3100 (Aśvaghoṣa); SRH. 34. 50 (var. Vidagdhajanavallabhā); SRK. p. 76. 6 (ST.); Tantrākhyāyikā II. 115; cf. Garuḍamahāpurāṇa 113. 52 (paraphrase in Upajāti metre); Prabandhacintāmaṇi 3. 170; SHV. f. 63b, 79b; SS. 46. 14; SL. f. 27a; SSD. 4. f. 4a; SMV. 8. 24; JSV. 262. 5, f. 299b (*marg.*).

41 Om. in Jodhpur 1, Mysore 582. — [a]) G_3 सुभूषणं (for विभू°). B_2 Est स्वजनता (for सुजनता). E_3 J_1 सौर्यस्य; X Y_1 शूरस्य (for शौर्यस्य). — [b]) $J_{1,3}$ ज्ञानस्योपशमं; G_1 M ज्ञानस्योपरमः (M_3 °तिः). A H कुलस्य; B C D F_3 S (except G_1 M_3) श्रुतस्य; Esc समस्य (for शमस्य). E_5 विभवस्य (for वित्तस्य). C पात्रेर्पणं (for पात्रे व्ययः). — [c]) Eot. 1t. 2 तपसां (for तपसः). W_4 प्रभवितुं. J_1 निर्वाजिता. — [d]) C सर्वेषामिह; X_2 सर्वस्यामपि (for सर्वेषामपि). C कारणं परमिदं; X G_4t.v. सर्वभूषणमिदं.

BIS. 1487 (581) Bhartṛ. ed. Bohl. 2. 80. Haeb. 46. lith ed. I and III. 81. Galan 83. Prasaṅgābh. 3. Subhāsh. 180; SRB. p. 84. 20; SBH. 3054; SRH. 180. 11 (Sarasvatīkaṇṭhābharaṇa); SRK. p. 14. 34, and p. 231. 6 (Bh.); Sūktāvali 1; SA. 8. 48; ST. 1. 51; SHV. app. I. f. 9b. 43; SM. 1353; SSD. 2. f. 116b; SSV. 1335; JS. 370.

42 [a]) F_5 आंध्यं (for जाड्यं). A_{0-2} संसति; A_3 यच्छति; W_8 सिंचत; T_3 (orig.) सीदति (for सिञ्चति). W_3 सत्यमानो (for वाचि सत्यं). — Est transp. पापमपाकरोति (in [b]) and दिक्षु तनोति कीर्तिं (in [c]). — Gst चित्तं (for चेतः). Y_3 प्रसारयति (for प्रसाद°). M_8 करोति (for तनोति). F_4 कीर्तिः. — [d]) J_1 [illegible] (for °तिः).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ ४२ ॥

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते येषु वसन्ति निर्मलगुणास् तेभ्यो*ऽपरेभ्यो नमः ॥४३॥

तृष्णां छिन्धि भज क्षमां जहि मदं पापे मतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान् मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान् गुणान्
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां चेष्टितम् ॥४४॥

BIS. 2376 (955) Bhartṛ. ed. Bohl. 2. 20. Haeb. 48. lith. ed. I. 22. Galan 23. Saṁskṛtapāṭhop. 62. Subhāsh. 309; SRB. p. 87. 29; SRK. p. 88. 1 (Bh.); SA. 24. 81; SS. 29. 5; SK. 2. 191; PT. 1. 58; SSD. 2. f. 114b; SMV. 9. 60.

43 [a]) J_{3} $Y_{2.4-8}$ T $G_{2.3.5}$ °संगतौ (for °संगमे). $A_{1.2}$ J_{2} (t.v. as in text) बुधजने (for परगुणे). — [c]) B_{1} $E_{0.1.5}$ (and Ec) I चार्हति; J_{3} Y_{6} M चक्रिणि (for शूलिनि). J_{2} भक्तिर् (for शक्तिर्). $E_{3}t$ °पदने (for °दमने). B_{1} Y_{4} $G_{3.4}$ खलेषु; J Y_{5-8} T $G_{1.2.5}$ $M_{1.3-5}$ खलैर् (for खले). — [d]) J_{1} Y_{7} ये ते; X $Y_{1.2}$ ह्येते (for एते). Y_{1} यत्र (for येषु). C E_{5} $W_{1.3}$ M येष्वेते निवसंति; D ये तेषु वसंति; $W_{2.4}$ येष्वेतेषु नरेषु (for एते येषु वसन्ति). A_{0-2} तेभ्यः परेभ्यो नमः; A_{3} B C D E $F_{1.3-5}$ H I W X $Y_{1.3.8}$ $M_{1.2.4.5}$ तेभ्यो नरेभ्यो नमः; F_{2} J_{3} $Y_{2.4-7}$ T G तेभ्यो महद्भ्यो नमः; $J_{1.2}$ T_{1}c.v. तैरेव भूर्भूषिता; M_{3} तेष्वेव लोकस्थितिः.

BIS. 6031 (2773) Bhartṛ. ed. Bohl. 2. 52. Haeb. 49. lith. ed. I and III. 61, II. 62. Galan 65. Saptaratna 1 (Haeb. p. 51). Kāvyakal. and Kāvyas. Prasaṅgābh. 8. Subhāsh. 159, 309; SRB. p. 53. 259; SBH. 2944; SRK. p. 18. 71 (Bh.); Mahānāṭaka 3. 37; VS. 345 (Bh.); SHV. app. I f. 9b. 42; SS. 6. 27; SK. 2. 63; PT. 1. 59; SSD. 2. f. 92b; SSV. 31; JS. 12.

44 [a]) C भिंधि (for छिन्धि). $E_{3}t$ जभ (by metathesis); W_{2} (orig.).4 मज; W_{2}m.v. त्यज (for भज). B $F_{1.4}$ त्यज (for जहि). W_{2} पदं (for मदं). W_{4} पापैर् (for पापे). N (except A C I) S (except W_{2-4} $M_{4.5}$) रतिं (Y_{4} कृतिं) (for मतिं). — [b]) $W_{2.3}$ स्वल्पं (for सत्यं). X साधुपदवी; G_{1} $M_{2.3}$ साधुचरितं. F_{1} सर्वस्व (for सेवस्व). B_{2} C F_{5} $Y_{6.8}$ T $G_{1.2.5}$ M विद्वज्जनं. — [c]) T_{3} वाक्यान्; $G_{2.3}$ $M_{4.5}$ मान्यं (for मान्यान्). C [अ]नुनयन्; H_{1}c.v. I G_{4} [अ]पनय; Y_{7} व्यपनय (for [अ]नुनय). $W_{1.2.4}$ Y_{3-8} T G_{1-4} $M_{1.3}$ प्रख्यापय; W_{3} प्रक्षापय; Y_{1} (A and B) प्रच्छादयन्. Y_{3-7} $T_{1.3}$ G_{2-4} M_{1} प्रश्रयं; Y_{8} स्वं शुभं (for स्वान्गुणान्). — [d]) F_{1} कीर्तीः; W_{4} X_{1} कीर्तिः. $F_{3.4}$t.v. $J_{1.2}$ W $M_{1.2}$ लक्षणं; Y_{7} चेषितः; $M_{4.5}$ भूषणं (for चेष्टितम्).

BIS. 2597 (1051) Bhartṛ. ed. Bohl. 2. 70. Haeb. 51. lith. ed. I and III. 76, II and Galan 78; SRB. p. 53. 273; SRK. p. 37. 1 (Śp.); SS. 26. 9; SU. 1441; JSV. 18. 23.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुणवदगुणवद् वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामा विपत्तेर्
भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ४५ ॥

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥४६॥

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः स्वजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ ४७ ॥

---

45 a) B_2 H सगुणमपगुणं वा; C Y_{1C} उचितमनुचितं वा; J_2 गुणवदगुणजाता; $W_{2.4}$ गुणवदगुणबद्धा. X कुर्वतो. A_{0-2} C E_{1t} F_5 W कार्यमादौ; A_3 कार्यजाता; E_{3t} °यातं; J_3 T_3 °जालं. — c) B_{1t} अतिरसभ°. X विपत्तौ (for °त्तेर्). — d) Y_6 हृदयदावा; $M_{4.5}$ °तापी (for °दाही). A_2 शीलतुल्यो; J_2 तुल्यकुल्यो (for शल्यतुल्यो).

BIS. 2122 (843) Bhartṛ. ed. Bohl. and lith. ed. I. 2. 97. Haeb. 52. Galan 103; Śp. 1391; SRB. p. 93. 82 and p. 176. 973; SBH. 2394; SRK. p. 77. 9 and p. 243. 13 (Bh.); SHV. f. 94b. 45; SS. 52. 2; SN. 747; SSD. 2. f. 133b; SSV. 364; BPB. 24; SKG. f, 5b.

46 a) $M_{1.2}$ वने जने; M_3 परे वने (for वने रणे). W_4 °जलाग्निमलाग्निमध्ये. — b) E_0 F_4 W Y_2 °संकटे वा; X $G_{2.3}$ $M_{3.4}$ °मस्तके च (M_4 °केव); T_3 °कंदरायां (for °मस्तके वा). — c) C प्रबुद्धं (for प्रमत्तं). $E_{0.2.3}$ (orig.) विषमं स्थितं वा; X विषमस्थितं च; G_4 °स्थले च. — d) C कर्माणि (for पुण्यानि). J_{1t} पूर्वकृतानि; M_2 पुरातनानि (for °कृतानि).

BIS. 5933 (2720) Bhartṛ. ed. Bohl. and lith. ed. I. 2. 95, II. 97, III. 96. Haeb. 54. Galan 99. Subhāsh. 110. Vikramacaritra 42; SRB. p. 92. 56; SRK. p. 76. 7 (ST.); SA. 24. 63; SHV. f. 61a; SSD. 2. f. 120a; SMV. 25. 5; JS. 26.

47 a) F_3 जगति; J_2 om.; $Y_{4.5}$ विशतु (for भवति). A_3 J_1 $Y_{4-6.8}$ T_1 G_5 यस्य (for तस्य). C परं; F_5 T_2 पुर- (for पुरं). D $F_{2.5}$ J_{1t} X $Y_{2.3.7}$ T_3 G_4 सर्वे जनाः; W_1 सर्वों (com. °वै) जनाः (for सर्वो जनः). W_3 om. hapl. जनः स्व-. B C $E_{2.3}$ W X Y_1 G_1 $M_{3.5}$ सुजनताम्. ($A_{0.1}$ com. सज्जनभाव [perhaps from सुजनताम्]). D $F_{2.5}$ W_1 X $Y_{2.3.7}$ T_3 G_4 उपयांति; $J_{2.3}$ समुपैति. J $G_{2.5}$ सद्यः; Y_{1B} यस्य (for तस्य). — c) C कृत्स्नापि; J_1 कृच्छ्रा च; W_{1t} वांछा च; Y_6 कृत्या च (for कृत्स्ना च). D भूर्भवतु; J_1 भूर्भवन-; M_5 भूमिवति (for भूर्भवति). F_4 संचित-; H J_1 $Y_{7.8}$ संनिधि- (for सन्निधि-). [J_1 com. कृच्छ्रा च भूः = यत्ता (= कृत्स्ना) भूमियु]. — d) E_{0t} विफलं (for विपुलं).

BIS. 4594 (2051) Bhartṛ. ed. Bohl. 2. 99. Haeb. 55. lith. ed. I. 100. Galan 101. Subhāsh. 41; SRB. p. 92. 74; SHV. f. 61a; SS. 10. 20; SSD. 2. f. 120a.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ् जयत्वाहवे
वाणिज्यं कृषिसेवनादि सकला विद्याः कलाः शिक्षतु।
आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः॥४८॥

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावणो वारणः।
इत्याश्चर्यबलान्वितोऽपि बलभिद् भग्नः परैः संगरे
तद् युक्तं ननु दैवमेव शरणं धिग् धिग् वृथा पौरुषम्॥४९॥

---

48 [a]) $W_{2.3}$ मज्जति (for मज्जतु). A C F_2 मेरुशिखरे. B C $E_{1-3.5c}$ $F_{2.4}$ I $J_{1t.3}$ X Y_1 (printed text) M_4 शत्रुं; Y_2 शूरं; $Y_{4.5}$ $G_{2.3}$ शक्त्या (for शत्रूञ्). J_{1t} X_2 जयति; M_3 जहीतु (for जयतु). — [b]) A Ic Wc वाणिज्या; Y_2 वाणिज्जं. F_4 कृतसेवनादि; W_{3c} कृशसेवनादि; X G_1 M कृषिसेवनं च; Y_6 T °सेवने च; Y_3 कृषिमप्युपैतु (for °सेवनादि). J_3 Y_2 G_4 M_3 सकलं (for सकला). C F_4 I Y_2 विद्याकलाः; X_1 विद्याः खलाः. D सिक्षतु; $W_{1.3t.4}$ शिक्षिताः; $M_{3.4}$ शिक्षितु. A विद्याः समभ्यस्यतु; J_1 विद्याकलाशिक्षितं (com. °तु). [Grammatically and metrically correct form शिक्षतां is nowhere found.] — [c]) J_1 transp. विपुलं and खगवत्. A_1 प्रयाति. M_2 त्यक्त्वा (for कृत्वा). W_1 प्रयत्नो. E_{o-2} (and Ec) पुनर्; E_{5t} पुमान्; J_1 परा; $W_{1.4}$ महान्; $W_{2.3t}$ महत्; M_2 परान्; M_5 वरं (for परं). — [d]) J_2 नाभव्यं. C भव्यस्य; F_2 J_1 W_4 Y_7 भावस्य (for भाव्यस्य). E_{3t} नाशो न तु; J_2 नाशं कुतः; J_3 न्नाशः कृतः; Y_7 नाशं कृतः. [$A_{o.1}$ वाणिज्याकृषिसेवनादिसकला is treated as a compound word; com. करसणसेवा प्रमुष समस्त विद्या. In E कृषिसेवनादि is a separate word.]

BIS. 4654 (2085) Bhartṛ. ed. Bohl. 2. 91. Haeb. 57. lith. ed. I. 99, II. 101. Galan 95. Śatakāv. 86; Śp. 438 (Bh.); SRB. p. 94. 116; SRK. p. 72. 20 (Bh.); SHV. f. 63b, 79b; SS. 46. 20; SSD. 4. f. 5a; SKG. f. 18a.

49 [a]) X_2 नैता (for नेता). B $E_{o.1t.2-4.5t}$ F I J $W_{3.4}$ Y_7 यत्र (for यस्य). X_3 सुरा. E_{3t} किंकराः (for सैनिकाः). — [b]) Y_7 G_4 स्वर्गं. $W_{2.3}$ अनिग्रहः; Y_6 असंग्रहः; G_4 अनुग्रहं. W किल (for खलु). D E_5 F_{3-5} W Y (except $Y_{1.7}$) T_{1B} G_{1-4} M ऐरावतो (for °वणो). Aot E_{2t} वारुणः; E_{3t} F_4 (by corr.) J_1 W_1 G_1 M_3 वाहनः; $F_{2.4}$ (orig.) $J_{2.3}$ $Y_{1A.7}$ T_3 रावणः; X $Y_{2.6}$ G_4 $M_{1.2.4.5}$ वाहनं (for वारणः). — [c]) B E W_1 (by corr.). $_3$ X Y_1 इत्यैश्वर्यबला(E_{3t} °सम)न्वितो; F_5 इत्यैश्वर्यवभान्वितो; It इत्याश्चर्यसमन्वितो; M_3 उच्चैरश्वबलान्वितो. M_5 सुरविराड् (for ऽपि बलभिद्). A E_2 W_{2-4} बलिभिद्; B_1 D E_{5t} F_{2-5} Ic W_1 X मघवा; B_2 $E_{o.1c.5c}$ मघवान्; $E_{ot.1t}$ बलवान्; It J_1 बलिभिद्; M_4 सुरराड् (for बलभिद्). A_3 भग्नं. — [d]) B $E_{o.1.3.5}$ (and Ec) F_5 H I W X_1 Y (except Y_2) T G_{3-5} तद्व्यक्तं; M_2 तदूव्युक्तं (for तद्युक्तं). C मम; G_4 बत (for ननु). W व(W_4 प)रमेव दैव- (for ननु दैवमेव). D $M_{4.5}$ हि परं; Y_3 *नृणां (for श णं). E_5 om. the first धिग्. Y_3 वृद्धौ क्षये कारणं (for धिग् धिग् वृथा पौरुषम्).

BIS. 3815 (1643) Bhartṛ. ed. Bohl. 2. 85. Haeb. 59. lith. ed. I. 87, II. 88. Galan 89. Vikramacaritra 172; SRB. p. 93. 100; SBH. 3151; SRK. p. 71. 10 (Śp.); Ātmānuśāsana Kāvya; SN. 803; SSD. 4. f. 3a; SSV. 293; SL. f. 36b.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानं भोगो नाशस् तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ५० ॥

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ५१ ॥

रत्नैर्महार्घैस् तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद् विरमन्ति धीराः ॥ ५२ ॥

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषास्
तान् प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।

---

50 [a]) H_2 X विनाशास्; W_{2-4} नाशश्च; G_4 नाशास् (for नाशस्). — [b]) J_2 हि तस्य (for वित्तस्य). — [c]) J_3 यो; T_3 यस्त (for यो न). [यस्त is the grammatically correct form, unless one takes तस्य = तस्य वित्तस्य (in [d])] D भुंक्ते; E_3 न भुक्ते; X_1 न हि भुंक्ते (for न भुङ्क्ते). F_5 यो न दाति न च भुंक्ते. — [d]) J_1 तस्यापि (for तस्य). J_2 त्रितया (for तृतीया). X_1 भवंति.

BIS. 2757 (1134) Bhartṛ. ed. Bohl. 2. 35. Haeb. 63. lith. ed. I. 42. Galan 45. Pañc. ed. koseg. II. 159. ed. Bomb. 148. Hit. ed. Johns. I. 172. Prasaṅgābh. 7; Śp. 390; SRB. p. 69. 15; SBH. 478; SRK. p. 63. 4 (Bh.); Vikramacaritra 72; ST. 42. 5; Prabandhacintāmaṇi 5. 264; cf. Tantrākhyāyikā 110 and SA. 18. 5; SHV. f. 70b, 86a; SS. 17. 14; SK. 2. 154; SU. 1498; PT. 6. 8; SN. 463; SSD. 2. f. 135a; JSV. 146. 7; SKG. f. 12a.

51 [a]) Est यस्यास्थि (for °स्ति). Y_7 पित्तं (for वित्तं), and तु लीनः (for कुलीनः). Est F_4 (t.v. as in text) श्रुतिमान् (for श्रुतवान्). F_4t.v. विनीतः (for गुणज्ञः). — [c]) Est युक्ता (for वक्ता). — [d]) Eot Y_7 T_2 $G_{1,4}$ जनाः (for गुणाः). $F_{1,2}$ $G_{1,4}$ $M_{1,2}$ आश्रयंते; Y_7 आहरंति.

BIS. 5414 (2447) Bhartṛ. ed. Bohl. 2. 33. Haeb. 64. lith. ed. I. 40, II. 41. Galan 44. Prasaṅgābh. 12. Subhāsh. 32. Carr. 452. Vikramacaritra 152; Śp. 333 (Bh.); SRB. p. 64. 9 (Bh.); SRK. p. 44. 6 (Bh.); SA. 114. 3; ST. 41. 7; Padyaracanā (KM 89, p. 111. 41, Bh.); VS. 306 (Bh.); SHV. f. 67a (Bh.) and 82a; SS. 39. 1; SK. 2. 169; PT. 5. 1; SM. 1155; SSD. 2. f. 105a; SSV. 1141; SMV. 4. 12.

52 [a]) B I महार्घ्यैस्; D F_3 W Y_1 (printed text) महार्हैस्; Eo. 2t. 5 X_2t महार्थैस्; F_3 महर्द्धिस्; J Y_{2-3} T G M महार्घ्येस् (for महार्घैस्). J तु न तुषुर् (sic) (for तुतुषुर्). — [b]) F_2 J_3 G_4 भीमविशेष- (for °विषेण). M_2 भीतिः. — [c]) W_3 स्वधां (for सुधां). Y_1 नैव ययुर्; G_3t संप्रययुर् (for न प्रययुर्). Y_5 विकासं (for विरामं). — [d]) C न निश्चयार्थाद्; Est F_5 J_1c विनिश्चितार्थाद्; J_3 $M_{1,4,5}$ सु(J_3 M_1 न)निश्चितार्था; Y_7 सनिश्चितार्थाद् (for न निश्चितार्थाद्). F_4 संतः (for धीराः).

BIS. 5707 (2585) Bhartṛ. ed. Bohl. 2. 72. Haeb. 65. lith. ed. I and III. 79, II and Galan 81; SRB. p. 77. 10; PT. 7. 14; SSD. 2. f. 99a.

53* Om. in BORI 329 and Ujjain 6414. — [a]) C संत्यन्ये च; J सत्यं नैव; G_4 संत्येवात्र (for सन्त्यन्येऽपि). Y_{1B} -प्रभृतिभिः (for °तयः). Eo. 1. 5 [अ]संभाविनः; F_2 [अ]संभाविताः (for संभा°). D पंचशास्; $J_{2,3}$ पंचषस्; Y_2 (m.v. as in text) निर्जरास्; T_2

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषीकृतः ॥ ५३ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां परोपकारेण न चन्दनेन ॥ ५४ ॥

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजन्मभीः ॥ ५५ ॥

यद् धात्रा निजभालपट्टलिखितं स्तोकं महद् वा धनं
तत् प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम् ।

(orig.) पंचधास्र (for पञ्चषास्र). — b) F2 स्वान् (for तान्). A C J प्रत्येक- (for प्रत्येष). J2 दिनेषु विक्रमरुचे. — c) Y1 T दिवाकर° (for दिनेश्वर°). Ao भाश्वरौ; B2 C Eo-2.5 F2.5 W1t Y1 (A as in text).3 भास्करौ; F4 W1c.2 भासुरौ; I भ्रातरौ; J2.3 भास्वतौ (for भास्वरौ). — d) D प्रातः; W1c.2-4 X1c.2 Y3 T3 M4 भ्रांतः; G1 M1-3.5 ह्रीतः (for भ्रातः). F3 यस्य; G4 सोपि (for पश्य). Y2 दैत्यरिपुणा (for दानवपतिः). D E F3 I W1t Y3 T G2.3 M1.2.4.5 शीर्षावशेषाकृतिः (D °तः); J1t Y7 शिष्या(Y7 °क्षा)वशेषीकृतः; J2 शीर्षं च शेषां कृतिः; W1c शीर्षावशेषः कृतः.

BIS. 6803 (3159) Bhartṛ. ed. Bohl. 2. 27. Haeb. 66. lith. ed. I and II. 34. Galan 37; SRB. p. 249. 99; SSD. 2. f. 7b.

54 Order in B F5 Y2 is *bacd*. — a) E3t श्रुतं (for श्रोत्रं). F4 श्रुतं नैव (for श्रुतेनैव). E3 च; E5 न च; F5 तु (for न). — b) E3t दाने च (for दानेन). E3 H I M1 च (for तु). E3t कंकरेण; Y1B कुंडलेन (for कङ्कणेन). — c) B1 Eo-2.3c.5 F2 X Y1 आभाति (for विभाति). D करुणापरायणा; F2-4 Y1B.2.4-6 G1t.v.4 करुणाकराणां; F4m.v, J1.3 Y3.7.8 T G1 M करुणाकुलानां; J2 G3t.v. करुणालयानां. — d) W1-3 परोपकारैर्न (for °कारेण). D च; F1 W1-3 तु; F5 न तु (for न). G1 M2.3 मंडनेन; M4.5 भूषणेन (for चन्दनेन).

